2024 TPJ | VOLUME 2, ISSUE 3
July - September | ISSN – 2584- 0517

# आधुनिकार्थशास्त्रनीतिशास्त्रनियमेकौटिल्यतत्त्वप्रतिपादनविमर

**श्री आदर्श विनायक भट्टः**
सहायकाचार्यः(संविदा) वेदाङ्ग-वेदभाष्यविद्याशाखा, केंद्रीयसंस्कृतविश्वविद्यालयः
श्रीराराजीवगान्धीपरिसरःश्रृङ्गेरी

**विशुद्धज्ञानदेहाय त्रिवेदी दिव्यचक्षुषे ।**
**श्रेयः प्राप्तिनिमित्ताय नमः सोमार्दधारिणे ।।**

**प्रस्तावना -**

इह खलु जगति शरीरभृतां मानवानां धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु प्रवृत्तिः सर्वसाधारणी एव । तत्र पुरुषार्थेषु आद्यो धर्मः। तादृशधर्मानुष्ठानेन पुरुषा इहामुत्र च लोके सुखमनुभवन्ति । तादृशपुरुषार्थे अन्यतमः अर्थाख्यः । स च अर्थः धर्मानुष्ठानाय, तद्धर्मानुष्ठानेन च पुरुषाः चरमं मोक्षाख्यं आत्यन्तिकदुःखध्वंसरूपं सुखमनुभवन्तीति अर्थस्यापि मोक्षोपकारकत्वं प्रसिध्यति । परमवैष्णवचणकमहर्षेः पुत्रत्वेन वा चणकगोत्रे वा समुत्पन्नस्य कौटिल्यस्य विष्णुगुप्तेति नामाङ्कितस्य 'अर्थशास्त्र'ग्रन्थः भारतीयसनातनपरम्परायाम् अत्यन्तं वैशिष्ट्यं भजते । तत्रापि विशिष्य इदानींतनकालेऽपि तस्मिन्ग्रन्थे उद्धृतस्य विहितस्य वा विषयस्य सांविधानिकक्षेत्रे परिपालनम्, तत्सांविधिनिकपुनारचनायाम् आधारत्वेन स्वीकरणं वा सामान्येन उत्पश्यामः । अनेनैव ज्ञायते अत्यन्ततीक्ष्णमतिना महात्मना कौटिल्येन विरचितग्रन्थच्छाया अस्माकं संविधाने स्फुटं भासत इति । तादृशानां ग्रन्थानाम् अध्ययनेन अवलोकनेन विवेचनेन च आर्थिकसमस्यापरिहारं, आर्थिकदृढतां कालान्तरे च आर्थिकव्यवस्थां वा अवगन्तुं शक्नुमः । तत्र प्रश्नाः भवेयुः, इदानीं कुतः अत्यन्तप्राचीनस्य ग्रन्थस्य अध्ययनम् ? अथवा तेन को लाभः? किं वा तस्य प्रयोजनम्? इति। परम् इदानीमपि प्राचीनपद्धतिः कुत्र उपयोक्ष्यमाण एव वर्तते, कुत्र अस्मीभिः विपरिणमितम्, कुत्र इदानीमपि प्राचीनपद्धत्यनुसारेण निर्णयः दीयते चेदेव उचितमित्यादि प्रश्नानां समाधानम् एतादृशविमर्शात्मकेन अध्ययनेनैव जायते । अतः तत्साधकानि नैकान्युदाहरणानि उद्देशनिर्देशमात्ररुपाणि सङ्गृह्य मया अत्र शोधप्रबन्धस्य सारांशभूते लेखनेऽस्मिन् विनिबध्यन्ते ।

**कुञ्चिकापदानि** – अर्थशास्त्रम्, भारतीयसंविधानम्, कौटिल्यतत्वानि ।

2024 TPJ | VOLUME 2, ISSUE 3
July - September | ISSN – 2584- 0517

**उद्देश्यम् -**

- इदानींतनकाले अपि अत्यन्तप्राचीनस्य ग्रन्थस्य प्रामाण्यता प्रतिपादनम् ।
- अस्माकं सनातनपरम्परायाः प्रतिपादनम् ।
- परम्पराध्ययनेन आधुनिककाले प्रयोजनप्रतिपादनम् ।
- आधुनिकव्यवस्थापेक्षया प्राचीनव्यवस्थानाम् उपेक्षणीयत्वनिरासः ।
- आधुनिकविषयाणामपि अर्थशास्त्रादिग्रन्थमूलकत्वप्रतिपादनम् ।
- भारतीयसंविधाननियमानाम् अर्थशास्त्रमूलकत्वप्रतिपादनम् ।

**प्रयोजनम् –**

- अर्थशास्त्रे प्रपञ्चितस्य विषयस्य नानोदाहरणपुरस्सराध्ययनेन इतोऽप्यधिकतमं सुस्पष्टज्ञानमुपलभ्यत इत्यतः अवश्यम् उदाहरणान्वेषणं कर्तव्यम् । तच्च उदाहरणम् अस्माकं संविधानग्रन्थे (साविधानिकक्षेत्रे) उपलभ्यत इति तत्रैव समन्वयः कर्तव्यः। तथा च अर्थशास्त्रस्य यत्र यत्र प्रयोजनं वर्तते, तच्च कथमित्यादि स्पष्टज्ञानं भविष्यति ।
- क्वचित्सन्दिग्दसन्दर्भे सन्देहनिवारकमपि भवति इदं विमर्शात्मकमध्ययनम् ।
- एतादृशतुलनात्मकाध्ययनं राजनीति-अर्थशास्त्राद्यध्येतृणामपि अत्यन्तम् उपकारं परिकल्पयिष्यति ।
- विशिष्य इदानींतनानां राजनीतिज्ञानां अर्थशास्त्रज्ञानां वा पुराणेषु ग्रन्थेषु आस्थां परिकल्पयितुं सहकारी भविष्यति ।
- समस्यायाः परिमार्जने, समस्या एव यथा नोदेति तथा राज्यपरिपालने वा प्राचीनप्रकाराः अवगन्तुं शक्याः।

**औचित्यम् -**

भारतीयन्यायालयादिषु भारतीयसंविधानपद्धत्या एव निर्णयाः उद्घोष्यन्ते । तत्रापि यत् परमं प्रमाणभूतं डा.बि.आर्.अम्बेड्करमहाशयैः विनिर्मितं च ग्रन्थविशेषम् आदृत्यैव निर्णीयत इति विदितमेव । एवमेव बहुपूर्वकाले कथं राजकीयव्यवस्था, न्यायव्यवस्था वा आसीदित्यपि प्राचीनग्रन्थाद्यवलोकनेन अवगच्छामः । तत्र तदानीं ये अपूर्वाः नियमाः, निर्णयाः, व्यवस्था वा तत्कालानुरोधेन विचिन्त्य परिरक्षिताः ते सर्वेऽपि इदानीं परिपालयितुं योग्याः न भवन्तीत्यपि स्पष्टमेव । परं तु केचन विषयाः सर्वदा समानाः, तदानींतनैरपि अनुसृताः, इदानींतनैरपि परिपाल्यमानाश्च अवलोक्यन्ते । तादृशेषु अस्माभिः भेदः, सामान्यं, वैशिष्ट्यं वा द्रष्टव्यं चेत् अवश्यम् एतादृशानां कौटिल्यार्थशास्त्रादीनां ग्रन्थानाम् अवलोकनं, तुलनात्मकाध्ययनं विमर्शात्मकं वा अध्ययनं कार्यमेव । तेषां प्रभावाः यावदस्ति इदानींतनकाले संविधाने वा, तैः प्रतिपादिततत्त्वानां परिपालनं कथं वर्तते? इत्यादि विषये ज्ञानाभिवृद्ध्यर्थं विधातव्य एव एतादृशशोधप्रबन्ध इति औचित्यं भजते ।

**शोधपद्धतिः -**

- **Article 74. Council of Ministers to aid and advise President, 75. Other provisions as to Ministers’’** इत्यस्मिन्छीर्षकोपेतेयोः संविधाननियमयोः अयमर्थः प्रधानमन्त्री एव राष्ट्रपतिसूचनाय मन्त्रिमण्डलस्य रचनां कुर्यात् । अर्थशास्त्रसम्मतमन्त्रिमण्डलरचना सर्वप्रथमा मन्त्रिणां कार्यविषयसाम्यं चेति कौटिल्यशास्त्रप्रभावम् अवलोकयितुं शक्ष्यामहे ।
- एवमेव कोषाधिकारिविषयेऽपि **Article 150. Form of accounts of the Union and of the States, and Article 151. Audit**

2024 TPJ | VOLUME 2, ISSUE 3
July - September | ISSN – 2584- 0517

**reports:** इत्यस्मिन्छीर्षके कोशाधिकारिणः सर्वेषाम् आयव्ययानां पट्टिकां दद्युरिति नियमः प्रकल्पितः । तदादौ तदन्ते च क्वचिन्नियमाः दृश्यन्ते ये च –

**''बाह्यमाभ्यन्तरं चायं विद्याद्वर्षशतादपि ।**
**यथा पृष्टो न सज्जेत व्ययशेषं च दर्शयेत्'' ।।**[1]

इतियादिभिः श्लोकैः अर्थशास्त्रग्रन्थे एव उपवर्णिताः । अस्यायमर्थः प्रगतानां शतवर्षाणामपि आयव्ययानाम् आवलिः (प्रमाणपत्राणि वा) कोशाध्यक्षस्य हस्ते भवेदिति।

- आनुशासनिकपत्रविषयेऽपि शास्त्रे पाठः दृश्यते यथा-

**''प्रज्ञापनाज्ञा परिदानलेखाः तथा परीहारनिसृष्टिलेखौ ।**
**प्रावृत्तिकश्च प्रतिलेख एव सर्वत्रगश्चेति हि शालनानि ।।''**[2]

इत्यादिभिः श्लोकैः अष्टौ अनुशासनपत्रप्रभेदाः (Varity's Of Order Letters)''विशेषेण तु भृत्येषु तदाज्ञालेखलक्षणम्'' इत्यादिभिश्च पत्रलक्ष्म च निर्दिष्टं यत् अस्माभिः अद्यत्वेऽपि परिगृह्यमानं च वर्तते ।

- सचिवसम्पुटविषये आचार्यैः कोषाध्यक्षः(Finance Minister), आयुधगाराध्यक्षः(Defence Minister), कोष्ठगाराध्यक्षः(Revenue Minister) इतियादिपदानि निर्दिष्टानि तान्येव अद्यापि अनुवर्तामहे इति विरुषः ।

- अर्थशास्त्रस्य विंशतितमे प्रकरणे भूमिच्छिद्रविधानमिति (N.A, Agricultural Land) विषये उल्लेखं पश्यामः । तत्रापि विशिष्य कृषिकार्यार्थम् अयोग्यप्रदेशे किं किं निर्मातव्यमित्यादिकमपि विहितमेव ।

- वैवाहिकजीवने अपि विच्छेदनादीनां विषये ''नीचत्वं परदेशं वा प्रस्थिते'' इति श्लेके हेतुनिर्देशश्च प्रपञ्चितो परिदृश्यते ।

- एवमेव क्वचिद्विरोधप्रतिपादकानि वाक्यानि च उपलब्यन्ते यथा विवाहकाले वरदक्षिणाप्रदानम् इत्यादीनि ।

- तथैव शास्त्रे विहितानि परन्तु इदानीं अपरिगृह्यमाणानि च वाक्यान्यपि बहुशो परिलोक्यन्ते तद्यथा मन्त्रिविषये विद्यायाः अनियमः, जातिभेदेन प्रतिशतविधिः(आरक्षणम्), सर्वत्र विद्यापुरस्कारस्थाने, साक्षात्कारसन्दर्भे वा जातिग्रहणेन क्वचित् प्रतिशतविधानेन आरक्षणम् च।

- यत् प्राथम्येन विरचितं नीतिशास्त्रम् अर्थशास्त्रं वा तस्य इदानींतनकाले उपयोगानुगुणं विपरिवर्त्यमाने कौटिल्यार्थशास्त्रस्य विचारमन्तरेण करणे पुष्कलप्रयोजनाभावमपि परिगणयितुं प्रवर्तामहे ।

- **Article 273. Grants in lieu of export duty on jute and jute products** इत्यत्र भाङ्गस्य विषये शुल्कस्वूकारः नैव कर्तव्यः, परं तेषामेव अनुदानादिकं दातव्यमिति नियमः कृतः । अस्साम् राज्यादिषु उत्पद्यमानस्य विशेषस्य सेरक्षणाय एतादृशी व्यवस्था परिकल्पिता । एषा च व्यवस्था अर्थशास्त्रेऽपि दृश्यत एव यथा -

**"राष्ट्रपीडाकरं भाण्डम् उच्छिद्यात् अफलं च यत् ।**
**महोपकारमुच्छुल्कं कुर्यात् बीजं तु दुर्लभम् ।।"**[3]

---

[1] कौटिल्यार्थशास्त्रे २३ प्रकरणे ५८ तमः श्लोकः ।

2024 TPJ | VOLUME 2, ISSUE 3
July - September | ISSN – 2584- 0517

इति । अस्यायमभिप्रायः राज्यस्य वा देशस्य वा नष्टदायकं यत् शुल्कं तत् न स्वीकार्यम् एवमेव राज्ये देशे वा यत् अत्यन्तं दुर्लभं द्रव्यं धान्यं वा तस्यापि शुल्कं न स्वीकार्यं तत् स्थाने प्रोत्साहनं देयमिति । अयमेव अंशः भारतसंविधाने अपि शोभत इति स्पष्टमेव कौटिल्यस्य अर्थशास्त्रे प्रतिपादितत्त्वानां प्रतीतिः ।

**अर्थशास्त्रे गूढचारविषये अपि प्रस्तावः कृतः । तत्र "गृहीतपुत्रदारांश्च कुर्यादुभयवेतनान् । तांश्चारिप्रहितान् विद्यात्तेषां शौचं च तद्विधैः ।। अन्तर्गृहचरास्तेषाम कुब्जवामनशण्डकाः । शिल्पवत्यः स्त्रियो मूकाश्चित्राश्च म्लेच्छजातयः ।। दुर्गेषु वणिजस्संस्थाः दुर्गान्ते सिद्धतापसाः । कर्षकोदास्थिता राष्ट्रे राष्ट्रान्ते व्रजवासिनः ।।"[4]**

वने वनचरैः कार्याः श्रमणाटविकादयः । परप्रवृत्तिज्ञानार्थाः शीघ्राश्चारपरम्पराः ।।"[2] इत्यादिभिः श्लोकैः गूढचाराः राज्ये राजाभावे समस्तक्रियाजातविषये ज्ञानार्थं, राज्यान्तरविषये वा ज्ञानार्थं गूढाचारव्यवस्था, तत्रापि के नियोजनीयाः, ते च नियोजिताः कुत्र भवेयुः इत्यादिव्यवस्था च आचार्यैः निर्दिष्टमेव । इयं च व्यवस्था न केवलं भारतदेशे विश्वस्मिन् सर्वत्र (RAW, Private agency) द्वारा परिपाल्यमाना एव वर्तते ।

एवमेव क्रयादिविषये, Tax विषये च आचार्यैः देशक्षेमार्थं सुविचाराः अर्थशास्त्राख्यग्रन्थे सुविचारिताः । यथा स्वीकारे जनानामपि लाभाय भवति, देशस्यापि हिताय भवति कस्यापि हानिः नैव सञ्जायते इति च स्पष्टं प्रतिपादितमेव ।

**शोधसारः -**

ज्ञात्वा अज्ञात्वा वा वयं सर्वे प्राचीनपरम्परामेव अनुसृत्य व्यहरामः । परं तद्विषयकज्ञान सत्वे व्यवहारे विवेकः जागरूकता प्राचीनपरम्परायाम् आस्था च अभिवर्धते । इदानींतन काले अत्यन्तं वेगेन आधुनिकतन्त्रज्ञानेन च परिवर्त्यमाने जगति नास्तिकता पुराणेषु अप्रामाणिकता एव आधिक्यान परिभासते । तद्वारणाय इदानींतनैः विज्ञानद्वारा यद्यत् आविष्कृतमिति बुद्ध्वा तादृशव्यवहरः व्यवह्रियमाणो वर्तते तस्य निरसनार्थं अस्माकं पूर्वजैः एव एते सर्वेऽपि विषयाः ग्रन्थे ग्रथिताः एव प्रतिपादनम् अत्यावश्यकम् । एवमेव पूर्वस्मिन् काले अत्यन्तम् अराजकता आसीत्, इदानीमेव सुव्यवस्था वर्तते इत्यादिकं मन्यमानानामपि समाधानार्थम् अर्थशास्त्रप्रभृतीनां प्राचीनग्रन्थानां विमर्शात्मकमध्ययनम् अवश्यम् । तेन पूर्वोक्तरीत्या भ्रमनिरसनं, प्राचीनपरम्परायाम् आस्था च सञ्जायत इति अयं प्रयासः । अतः शोधप्रकृतौ निर्दिष्टान् केचन विषयान् स्वीकृत्य आधुनिकनियमेषु योजनाय यत्नः अवश्यं करणीय इति मया प्रयासोऽयं विधीयमानो वर्तत इति अत्यन्तं संक्षेपेण शोधपत्रसारः प्रदत्तः । इति शम् ।

**अनुशीलितग्रन्थाः -**

१.चाणक्य-सम्पुट (सञ्जयप्रकाशन दिल्ली), सम्पादकाः – डा.जगदेव कुमार शर्मा, २०१६ ।

२.THE CONSTITUTION OF INDIA (Karnataka Official Language (Legislative) Commission and Directorate of Translations, Government of Karnataka.) २०१९

[2] चाणक्यार्थशास्त्रे १२ अध्याये ८ प्रकरणे १९,२१,२२,२३ श्लोकाः ।

2024 TPJ | VOLUME 2, ISSUE 3
July - September | ISSN – 2584- 0517